भारत-स्वातन्त्र्य-स्वर्णजयन्ती-ग्रन्थमाला-16

# भारतीयवाङ्मयेषु रससिद्धान्तः




## आद्याचरणझा

योऽनूचानः स नो महान्।
राष्ट्रियसंस्कृतसंस्थानम्

राष्ट्रिय-संस्कृत-संस्थानम्

भारत-स्वातन्त्र्य-स्वर्ण-जयन्ती-ग्रन्थमाला-16

# भारतीयवाङ्मयेषु रससिद्धान्तः

आद्याचरणझा

राष्ट्रिय-संस्कृत-संस्थानम्

1998

# विषय-सूची


| क्रमसं० | विषया: | पृष्ठाङ्का: |
|---|---|---|
| | पुरोवाक् | iii |
| | पृष्ठभूमि: | v |
| | Rasa Siddhānta in Indian Literature | vii |
| १. | पूर्वपीठिका | १ |
| २. | के च रसा: वेदे, उपनिषत्काले च | १ |
| | रसो वै स:, आयुर्वेदशास्त्रे, रामायणपुराणकाले च । | |
| ३. | भरतमुने: नाट्यशास्त्रम् | ४ |
| ४. | अग्निपुराणम् | ५ |
| | (क) तत्र विशेष: | ६ |
| ५. | पुराणकालनिर्धारणम् | १० |
| ६. | काव्यनाट्ययोर्मूलम् | ११ |
| ७. | नाट्यशास्त्रम् | १२ |
| ८. | नाट्यशास्त्रे रसविचार: | १४ |
| ९. | स्फोटवादेन रससाम्यम् | २१ |
| १०. | अभिहितान्वयवाद: | २२ |
| ११. | अन्विताभिधानवाद: | २२ |

अत्र **शोकस्थायिभावाभिव्यक्तः करुणरसः** काव्यात्मभूतः। स चाभिव्यक्तः। न केनापि निर्मितः नानुमितः, नोपमितश्च किन्तु सहसा क्रौञ्च्याक्रन्दजनितशोकेनाभिव्यक्तः। तस्याः हृदयविद्रावकशोकोद्ग्रारेण तादात्म्यतां गतः साधारणीकरणमयः महर्षिः स्वात्मानं विस्मृतवान्। अयमेव सामाजिकरसास्वादनभूतः तादात्म्य-भावः।

एतस्य विस्तृतं विवरणमग्रे विधास्यते। इदं चाग्रिमपथप्रदर्शनमात्रमेव।

**वाल्मीकिरामायणे** बालकाण्डे चतुर्थसर्गे रसानामुल्लेखो निम्नाङ्कितः।

**नाट्ये गेये च मधुरं प्रमाणैस्त्रिभिरन्वितम्।**
**जातिभिः सप्तभिर्बद्धं तन्त्रीलयसमन्वितम्॥ ८॥**

**रसैः शृङ्गारकरुणहास्यरौद्रभयानकैः।**
**वीरादिभिश्च संयुक्तं काव्यमेतदगायताम्॥ ९॥**

(निर्णयसागरप्रेसमुद्रितम्। चौखम्बाप्रेसमुद्रितम्।)

**विशेषः**

ममेयं भावना चासीत् यत् प्रथमं भारतीयवाङ्मयस्य हिन्दी बंगला मैथिली तमिलप्रभृतिग्रन्थेभ्यः **रससिद्धान्त** सम्बन्धिनं विचारं प्रदर्श्य अन्ते संस्कृतकाव्यशास्त्रीयप्रमुखग्रन्थानां सिद्धान्तं वैदेशिकचिन्तकानाञ्च विचारं पुस्तकेऽस्मिन् प्रदास्यामि। किन्तु यदा मया विभिन्नप्रमुखभाषायाः रससिद्धान्तसम्बन्धिविचाराः दृष्टाः तदा प्रथमा भावना मया परित्यक्ता, यतो हि सर्वे विभिन्नभाषाचिन्तकाः वैदेशिकाश्च भारतीयरससिद्धान्तविषये विविधविचारानेवादाय तर्कवितर्कं विधाय यथास्थानं किमपि परिवर्तितरूपं स्वमतमुल्लिखितवन्तः।

## अग्निपुराणम्

अतः मया भरतनाट्यशास्त्रस्य रससिद्धान्तं प्रथमं **अग्निपुराणतः** सङ्गृह्य तस्यैव व्याख्यारूपेण यथासम्भवं प्रमुखसंस्कृतवाङ्मयग्रन्थानां समीक्षणं विधाय

इत आरभ्य विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः इत्येषा नाट्य शास्त्राधारभूता पंक्तिरेव रससिद्धान्तप्रतिपादने **ॐ मित्येकाक्षरं ब्रह्म** इति भगवद्गीतावाक्यवदनन्तार्थद्योतिका विद्यते यस्याः यथासम्भवं नाट्यशास्त्ररहस्य- ज्ञानवतोऽभिनवगुप्ताचार्यमतं व्याख्या च अन्येषामपि काव्यसहित्य शास्त्रीयग्रन्थानां विवरणंविश्लेषणञ्च विधास्यते ।

**एतत् क्रमे नाट्ये अष्टौ रसाः शृङ्गारहास्यकरुण रौद्रवीरभयानकाः ।**
**वीभत्साद्भुत संज्ञौ चेत्यष्टौ नाट्ये-काव्ये रसाः स्मृताः ॥**

इति भरतकारिका । कुत्रापि वीभत्साद्भुतशान्ताश्च नव नाट्ये रसाः स्मृताः' इति पाठः । तेन नवरसाः ।

अस्याः कारिकायाः व्याख्यानेऽभिनवभारती विभाति इत्थम् । **नटेन क्रियमाणाभिनयप्रभावेण साक्षात्कारायमाणः एकाग्रमनसो निश्छलतयाऽनुभूयमानः - समग्रनाटकेन केनापि काव्येनापि प्रकाश्यमानोऽर्थः नाट्यं कथ्यते । यद्यपि तन्नाट्यं विभिन्ननायकनायिकादीनामालम्बनोद्दीपनविभावैरसंख्यविभावादिरूपम् । तथापि समस्ताचेतनविभावानां ज्ञाने ज्ञानस्य च कस्यचिदालम्बनविभावस्य भोक्तरि पर्यवसिते सति प्रधाननायकस्य रत्यादिस्थायिभावात्मकचित्तवृत्तिस्वरूपं नाट्यम् ।**

अस्यांशस्य कठिनतमभरतव्याख्यानभूतस्य गद्यांशस्य सरलीकृत पथाऽभिनवगुप्तेन विश्लेषणं कृतं यत् **प्रधानैकचित्तवृत्तिरूपनायकस्य गीत** लास्यादिलक्षणयुक्तैः गुणालङ्कारगीतवाद्यादिसंयोगैः चरमसौन्दर्यप्राप्तकाव्य महिम्ना तथा नटद्वारा प्रयोगपरम्परयाऽभ्यासविशेषप्रभावेण **ममायं मम नायं 'परस्यायं न परस्य** इति भेदभावमुक्तः **रसास्वादः** ब्रह्मास्वादसमः नटदर्शकयोर्मध्ये तादात्म्यरूपः । यथा- **साहित्यदर्पणे**

**परस्य न परस्येति ममेति च न ममेति च ।**
**तदास्वादेः विभावादेः परिच्छेदो न विद्यते ॥**




राष्ट्रिय-संस्कृत-संस्थानम्

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी,
नई दिल्ली-110058